Journal of Interdisciplinary and Multidisciplinary Research (JIMR)
E-ISSN:1936-6264| Impact Factor: 8.886| UGC CARE II
Vol. 19 Issue 06, June- 2024
Available online at: https://www.jimrjournal.com/
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

# ज्योतिषशास्त्रे संहितानुसारमुत्पातानां विमर्शः

## शोधपत्र

**लेखिका-सरितामहापात्रः**
**शोधछात्रा,ज्योतिषविद्याशाखा**
**मार्गदर्शकः-प्रो.विश्वरंजनपतिः केन्द्रीयसंस्कृतविश्वविद्यालयः**
**श्रीसदाशिव परिसरः, पुरी**

## 1. प्रस्तावना

भारतीयज्योतिषशास्त्रं सिद्धान्त-संहिता-होराभेदैः त्रिधाविभाज्यते ।तेषु त्रिषु स्कन्धेषु संहितास्कन्धेस्य काश्चन विशेषता वर्तते। विविधानां प्राकृतिक-मानवीयघटनानां पूर्वलक्षणानि नाम शकुनानि, विविधनिमित्तानां च वर्णनं संहिताग्रन्थे प्रतिपादितविषयानुरूपं वर्णितमस्ति । अत्रोत्पाताः विशेषस्थानं धारयन्ति। उत्पाताः अपूर्वाः, अचिन्त्याः, अशुभसूचकाः च घटनाः भवन्ति, यैः भविष्ये सम्भाव्यमानाः संकटाः, विपत्तयः, वा अन्यानि परिणामाः सूचिताः भवन्ति।

संहितास्कन्धे उत्पातानां विषये वर्णनं मिलति ।महर्षिगर्गः उत्पातानां विषये महामुनिअत्रेः समक्षं प्रतिपादयति । उत्पातशब्दस्य व्युत्पतिः '**उत्**' उपसर्ग पूर्वकं '**पत्**' धातोः '**घञ्**' प्रत्यये निष्पद्यते । उत्पतति अकस्मादायाति यः स उत्पातः । पुनः प्रकृतेरन्यत्वमुत्पात इति **यः प्रकृतिविपर्यासः सर्वः संक्षेपतः स उत्पातः**[1] ।

वस्तुतः उत्पातस्य उत्पाद्यार्थं मनुष्यणां भूमिका महती वर्तते । नराणामपचारेण पापसञ्चयो भवति । तस्मात् पापात् उपद्रवः जायते । दिव्यान्तारिक्षभौमाः इति त्रिविधोत्पाताः वर्णिताः सन्ति ।दिवि /आकाशे जायमाना उत्पातः दिव्याः,अन्तरिक्षे जायमाना उत्पातः अन्तरिक्षाः भूमौ च भौमाः उत्पातयः जायन्ते । इत्यत्र महर्षिगर्ग वचनं तद्यथा-

[1] **समाससंहिता**

**अतिलोभादसत्याद्वा नास्तिक्याद्वाप्यधर्मतः ।**

**नरापचारान्नियतमुपसर्गः प्रवर्तते ।।**[2]

मनुष्याणामविवेकता कारणात् देवताः विरक्ताः सन्तः एतान् उत्पातान् सृजन्ति । तेषामुत्पातानां निवारणाय राजा राष्ट्रे सुशान्तमय वातावरणं कुर्यादिति ।

**2. उत्पातानां स्वरूपं**

उत्पाताः विविधप्रकारेण भवन्ति, यथा—

**दिव्यं ग्रहर्क्षवैकृतमुल्कानिर्घातपवनपरिवेषाः ।**

**गन्धर्वपुरपुरन्दरचापादि यदान्तरिक्षं तत् ।।**[3]

**भौमं चरस्थिरभवं तच्छान्तिभिराहतं शममुपैति ।**

**नाभसमुपैति मृदुतां शाम्यति नो दिव्यमित्येके ।।**[4]

**दैविकोत्पाताः** - सूर्यचन्द्रग्रहणाम्, नक्षत्रसम्बन्ध्युत्पाताः।

**अन्तरिक्षोत्पाताः**-उल्का-निर्घात-परिवेष-गन्धर्वनगर-इन्द्रचापादिभ्योत्पाताः ।

**भौमोत्पाताः** – अग्निवैकृतम् ,वृक्षवैकृतम्, सस्यवैकृतम्,जलवैकृतम्,प्रसववैकृतम्, चतुष्पदवैकृतम् ,वायव्यवैकृतम् ,शक्रध्वजेन्द्रकीलादिवैकृतम् ।

**3. दैविकोत्पाताः-**

क्षितौ भारतवर्षं मध्यगतं विभाव्य पृथिवीं च नवदिक्षु (मध्य-पूर्व-अग्नि-दक्षिण,नैऋत्य,पश्चिम,वायव्य,उत्तर, ईशान) विभज्य प्रत्यकस्मिन् भागे कृतिकादिनां त्रयाणां नक्षत्राणां

---

[2] **गर्गसंहिता**

[3] **वृहत्संहिता, उत्पाताध्यायः,श्लोक-04**

[4] **वृहत्संहिता, उत्पाताध्यायः,श्लोक-05**

Journal of Interdisciplinary and Multidisciplinary Research (JIMR)
E-ISSN:1936-6264| Impact Factor: 8.886| UGC CARE II
Vol. 19 Issue 06, June- 2024
Available online at: https://www.jimrjournal.com/
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

स्थापनं भवति। दिशानुसारं नक्षत्राणां कूरग्रहैः पीडनं मर्दनञ्च भवति चेत् तत्स्थानस्य निवासिनः पीडिताः भवन्ति।

**क्षितौ भारतवर्षेऽस्मिन् नवभागव्यवस्थया।**

**बहुलाद्यास्त्रयो ऋक्षा मध्यदेशादिषु स्थिताः॥**

**क्रूरग्रहहते तैस्तु पीड्यन्ते तन्निवासिनः।**

**ते पीडामुपयास्यन्ति भिन्नैः क्रूरैश्च मर्दितैः॥**[5]

शनिसूर्यौ कस्यापि नक्षत्रस्य गमनेन, मङ्गलः कस्मिन् नक्षत्रे वक्रीभावेन, राहुः उपरागेण, केतुः आधुमनोदयैः, जीवशुक्रज्ञाः उदयास्तेन, चन्द्रमा आच्छादनेन अपसव्य योगेन पीडिताः भवन्ति। यस्मिन् नक्षत्रे दिव्य-भौम-अन्तरिक्षसमुहाणां उत्पातः दृश्यते, तन्नक्षत्रं स्वदिशि जनान् पीडयति। मार्कण्डयोबाच –

**शनैश्चरार्कौ चारेण वक्रेणाङ्गारको ग्रहः।**

**उपरागेण राहुस्तु केतुश्चाधूमनोदयैः॥**

**उदयास्तमयाभ्यां च जीवशुक्रशशाङ्कजाः।**

**सञ्छादनेन च शशी असम्यग्योगतस्तथा॥**

**तथा च यस्मिन् नक्षत्रे दिव्यपार्थिवनाभसाः।**

**दृश्यन्ते सुमहोत्पाताः स्वां दिशं तत्र पीडयेत्॥**[6]

---

5 अद्भुतसागरम्

6 अद्भुतसागरम्

**Journal of Interdisciplinary and Multidisciplinary Research (JIMR)**
**E-ISSN:1936-6264**| Impact Factor: 8.886| UGC CARE II
Vol. 19 Issue 06, June- 2024
Available online at: https://www.jimrjournal.com/
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)
RESEARCHERID
THOMSON REUTERS

दिशानुसारं नक्षत्राणां पीडने उक्तदिशि अवस्थितं जनपदानामपि पीडनं भवति। विशेषरूपेण शूरसेनः, मगधः कलिङ्गः, अवन्ती, सौरः, सैन्धवः, हारभूमिः, मद्रः, पुलिन्दादि देशाधिपतिनां पीडनं भवन्ति।

**दिङ्नक्षत्रेषुपसृष्टेषु दिग्जनपदानामुपतापो भवति।**
**विशेषतस्तु शूरसेनमगधकलिङ्गावन्तिसौर सैन्धवहार भूतिमद्रपुलिन्दाधिपतीनाम्।।**[7]

वराहसंहितायां तु उत्तम् –

**वर्गैराग्नेयाद्यैः क्रूरग्रहपीडितैः क्रमेण नृपाः।**

**पाञ्चालो मागधिकः कालिङ्गश्च क्षयं याति॥**

**आवन्तोऽथानों मृत्युं चायाति सिन्धुसौवीरः।**

**राजा च हारहौरो मद्रेशोऽन्यच कौलिन्दः ॥**[8]

शुभग्रहैः युतैः यदि नक्षत्राणि भवन्ति तर्हि नक्षत्राण्यवस्थितं दिशानां अभ्यूदयं करोति 1

**परिहाराउपायः-** प्रभूतकनकान्नगोमहीदानैः, शिवालयभूमौ गोदोहनैः, कोटिसंख्यकगोघृतहवनैः दिव्योत्पातानां शान्तिर्भवति।

**4.अन्तरिक्षोत्पाताः-** अन्तरिक्षे यदा असामान्यं, अप्राकृतिकं वा दृश्यते—यथा उल्कापातः, धूमकेतवः, मेघविचित्ररूपं, सूर्यचन्द्रयोः विवर्णता, असमयेइन्द्रधनुः, खगोलभास्वराणां विकारः इत्यादि—ते सर्वे उत्पातलक्षणानि स्युः। एतेषां दर्शनं सामान्यतः लोकविपत्तिसूचकं, राज्यभ्रंशसूचकं वा भवति।

---

[7] **अद्भुतसागरम्**
[8] **वराहसंहिता,श्लोक-52**

**5.भौमोत्पाताः-**

**अग्निवैकृतम्-** यस्मिन्न राज्ये काष्ठयुतोऽपि अग्निः न प्रज्वलेत्, विनैवाग्निं ज्वलनं भवेत् तद्राज्ये राजा देशवासिनश्च पीडिताः भवन्ति ।जलमांसाद्रवस्तुषु ज्वलने नृपतिवधः, खड्गादिज्वलने भयङ्करयुद्धः, सैन्यग्रामपुरेषुच वह्निः न दृश्यते अग्निभयं भवति । विनैवाग्निं प्रासादं-भवनं-तोरणं- केन्वादिनां दग्धं जायते तर्हि षण्मासात्परं अपरनृपस्य सौन्यगमः भवति। उक्तञ्च-

**प्रासादभवनतोरणकेत्वादिष्वननलेन दग्धेषु ।**

**तडिता वा षण्मासात् परचक्रस्यागमो नियमात् ।।**[9]

विनाग्निना यत्र धूमो दृश्यते, अह्निजं तमोऽन्धकारश्च महद्भयं ददाति, आकाशे मेघाभावे रात्रौ नक्षत्राणां अदर्शनं एवं दिवसे दर्शनं कारणात् अतिभयं उत्पद्यते । गर्गेण उक्तम्-

**अनिशानि तमांसि स्युर्यदि वा पांशवो रजः।**

**धूमश्चानग्निना यत्र तत्र विन्द्यान्महद्भयम्।।**[10]

**परिहाराउपायः-** अग्निवैकृतिः क्षीरवृक्षैः सर्षपैः घृतैश्च अग्नौ हवनं करणीयम् । ब्राह्मणेभ्यः सुवर्णं प्रदातव्यम् ।

**वृक्षवैकृत्यम् :-**

अकस्मात् वृक्षाणां शाखास्फोटने युद्धोद्योगं, वृक्षाणामेव हसने देशस्य विनाशनं, तेषामेव रोदने व्याधिवाहुल्यं भवति । वृक्षाणांम ऋतुवर्जितकाले पुष्पफलोद्गमे राष्ट्रस्य विभेदो भवति। बालवृक्षे सजातपुष्पे शिशुनां नाशं एवं वृक्षात् क्षीरस्त्रावे सर्वद्रव्याणां विनाशं भवति । वृक्षान्मद्य निर्गते वाहनानामश्वादीनाञ्च नाशं, रक्तस्त्रावे युद्धः, मधुस्त्रावे व्याधिः, तैलादिकं निर्गते दुर्भिक्षभयं, वृक्षातः जलस्त्रावे महद्भयं भवति । उक्तञ्च-

---

[9] वृहत्संहिता, उत्पाताध्यायः,श्लोक-20

[10] गर्गसंहिता

Journal of Interdisciplinary and Multidisciplinary Research (JIMR)
E-ISSN:1936-6264| Impact Factor: 8.886| UGC CARE II
Vol. 19 Issue 06, June- 2024
Available online at: https://www.jimrjournal.com/
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

**मद्ये वाहननाशः संग्रामः शोणिते मधुनि रोगः।**

**स्नेहे दुर्भिक्षभयं महद्भयं निःस्रुते सलिले ।।**[11]

शुष्कवृक्षाणां अङ्कुरोद्गमे वीर्यं अन्नञ्च क्षयं भवति, पतितानां वृक्षाणां स्वयं उत्थाने दैवजनितभयं दृश्यते। पुजितवृक्षे अन्नृतौ पुष्यफलोद्गमे राज्ञः विनाशं, तस्मिन्वृक्षे अग्निज्वलाकारणातपि राज्ञः मृत्युः संभवति । केषाञ्चन वृक्षाणां गमने, तस्मात् शब्दकारणात् मनुष्याणां बिनाशः सम्भवति। सर्वेषां वृक्षाणां विकारे दशमासगतैः फलविपाको भवति।

**परिहाराउपायः-** पादपस्य पूजन स्रग्भिः, सुगन्धद्रव्यैः, धूपैः, अम्बरैः करणीयम्। विकायुक्तवृक्षाणामुपरि छत्रं विधाय एकादशरुद्राणां जपः कुर्यात्। इन्द्राय स्वाहा इति मन्त्रेण षड् वारं होमः कर्तव्यः । घृतयुतेन पायसेन सब्राह्मणान् भोजयेत् ।

**वृष्टि वैकृतम्:-**

अनावृष्टौ दुर्भिक्षं भवति , अतिवृष्टौ दुर्भिक्षं शत्रुभयञ्च भवति । वर्षाकालं विहाय अन्यस्मिन् काले वृष्टिः रोगभयं , मेघं विनां वृष्टिः राज्ञो मरणं भवति । उक्तंच -

**दुर्भिक्षमनावृष्टावतिवृष्टौ क्षुद्भयं परभयं च ।**

**रोगो ह्यनृतुभवायां नृपतिवधोऽनभ्रजातायाम् ।।**[12]

वर्षाकालं पृथक् अन्यस्मिन् काले सप्तदिनपर्यन्तं अतिवृष्टिकारणात् प्रधाननृपस्य मरणं , रक्तवृष्टिकारणात् युद्धं, मांसास्थिवसादिवृष्टिं हेतु जनानां मरणं जायते ।मेघेनविना उपलानां वृष्टिः, विकृतप्राणिनां वृष्टिः, अतिवृष्टिः, यत्र-कुत्रापि अनावृष्टिकारणात् शस्यानां 'ईति' रोगस्य भयं भवति ।

11 वृहत्संहिता, उत्पाताध्यायः,श्लोक-27

12 वृहत्संहिता, उत्पाताध्यायः,श्लोक-38

Journal of Interdisciplinary and Multidisciplinary Research (JIMR)
E-ISSN:1936-6264| Impact Factor: 8.886| UGC CARE II
Vol. 19 Issue 06, June- 2024
Available online at: https://www.jimrjournal.com/
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

निर्मलसूर्यकिरणवसात् सति वृक्षादिनां प्रतिविम्बं न दृश्यते अथवा विपरितं दृश्यते तदा देशे भयमुत्पाद्यते, वक्तव्यमिति ---

**यद्यमलेऽ के छाया न दृश्यते प्रतीपा वा।**

**देशस्य तदा सुमहद्भयमायातं विनिर्देश्यम् ।।**[13]

आकाशे मेघाभावे दिवारात्रौ पूर्वापरदिशि इन्द्रधनुं दृश्यते तर्हि राज्ये दुर्भिक्षमपि भवति।

**परिहाराउपायः** -वृष्टिविकारकाले सूर्यः-चन्द्रः-वायुः-मेघादि देवानां यज्ञः करणीयम्। धान्यानि - उन्नानि - धेनवः -सुवर्णानि एतानि दक्षिणारूपेण ब्राह्मणेभ्यो देयम् ।ततोऽनन्तरं शान्तिमुपैति।

**जलवैकृतम्-**

यदि नगरस्य समीपवर्ती नदीनां दूरे वहति, अशुष्कह्रदादि शुष्कं प्रतिभाति, तर्हि प्राणीनां अभावः दृश्यते। पुनः यदि नद्यां तैलं -रक्तं -मांसादि वहन्ति अथवा जलं शुष्कं -स्वल्पं कलुषितं भवति तदा षण्मासात् परं नृपः परचक्रागमनं भवति इति कथयन्ति।

**अपसर्पणं नदीनां नगरादचिरेण शून्यतां कुरुते।**

**शोषश्चाशोष्याणामन्येषां वा ह्रदादीनाम् ।।**

**स्नेहासृमांसवहाः सङ्कलकलुषाः प्रतीपगाश्चापि।**

**परचक्रस्यागमनं नद्यः कथयन्ति षण्मासात् ।।**[14]

कुपे अग्निज्वलनं , धूमं, रेदनशब्दं, गीतं, एतानि यदि विभिन्न ध्वनिं श्रूयते जनानां मरणं अवश्यं भवति ।समतलभूमौ जलस्योत्पत्तिःजलानां गन्धरसविपर्यः,जलासये वैकृतादि अग्निभयं उत्पादयन्ति ।

[13] वृहत्संहिता, उत्पाताध्यायः,श्लोक-44

[14] वृहत्संहिता, उत्पाताध्यायः,श्लोक-47,48

**परिहाराउपायः** - सलिलविकारे वरुणमन्त्रैः पूजां, जपं, होमं च कुर्यात्। अनेन प्रकारेण पापोपशमनं भवति ।

**चतुष्पाद वेकृत :-**

एकस्मिन् योनौ पशुः अन्यस्मिन् योनौ पशुभिः सह यदि अभिगमनं भवति, वृषभं धेनु परस्परं स्थनपानकर्त्तुं चेष्टां करोति, तर्हि मासत्रयेण अन्यराज्यस्य राज्ञः अगमनं भवति ।

**परयोनावभिगमनं भवति तिरश्चामसाधु धेनूनाम्।**

**उक्षाणो वान्योन्यं पिबति श्वा वा सुरभिपुत्रम् ।।**

**मासत्रयेण विन्द्यात्तस्मिन्त्रिः संशयं परागमनम्।**

**तत्प्रतिघातायेतौ श्लोकौ गर्गेण निर्दिष्टौ ।।**

तस्मिन्नुत्पाते मासत्रयेण परागमनं निःसंशयं जानीयात्। तथा च गर्गेण उक्तम्-

**वियोनिषु यदा यान्ति मिश्रीभावः प्रजायते।**

**खरोष्ट्रहयमातङ्गा मनुष्या वा न साधु तत्।।**

**अकालसक्ता दृश्यन्ते काले च विमदा यदि।**

**मातङ्गोष्ट्रहयश्वानः पक्षिणो वा न साधु तत्।।**

**धेनुं धेनुः पिबेद्यत्रानुड्वानं ह्यनुडुत्तथा।**

**श्वा वा पिबेद्धेनुमथ धेनुः श्वानमथापि वा ।।**

Journal of Interdisciplinary and Multidisciplinary Research (JIMR)
E-ISSN:1936-6264| Impact Factor: 8.886| UGC CARE II
Vol. 19 Issue 06, June- 2024
Available online at: https://www.jimrjournal.com/
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

**प्राप्तेषु त्रिषु मासेषु परचक्रागमं वदेत्।। इति।**[15]

**परिहाराउपायः-** एतेषामुत्पातानां विनाशाय श्लोकौ गर्गेण कथितौ-

**त्यागो विवासनं दानं तत्तस्याशु शुभं भवेत्।**

**तर्पयेद् ब्राह्मणांश्चात्र जपहोमांच कारयेत्।।**

**स्थालीपाकेन धातारं पशुना च पुरोहितः।**

**प्राजापत्येन मन्त्रेण यजेदबहृत्रदक्षिणम् ।।**

विकारयुक्तपशूनां त्यजने अथवा स्थानान्तरणे चतुष्पदस्य शुभं भवेत्। अस्योत्पातस्य शान्त्यार्थं ब्राह्मणान् पूजयेत्, जपहोमादि कारयेत् ।

**निष्कर्षः-**

संहिताज्योतिषे उत्पातानां गम्भीर विवेचन भवति। एते न केवलं प्राकृतिकानि दैविकानि च घटनाः अपि तु मानवीयकृतदुष्कृतानां फलं अपि सूचयन्ति। यद्यपि वैज्ञानिकदृष्ट्या अपूर्वप्रकटनानि स्वाभाविकानि सन्ति, तथापि ज्योतिषशास्त्रदृष्ट्या एते नियोजितफलदायकानि इत्यपि दृश्यते। अतोऽस्माभिः उत्पातलक्षणानि अध्ययनं कृत्वा तेषां परिहाराय उचिताः उपायाः यथाशक्ति करणीयाः।

**********************

15 **गर्गसंहिता**